दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणकृष्णामावस्या
फाल्गुण 05 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-117 | 1 | फरवरी 17, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचलप्रदेशे आर्थिकसंकटेऽपि प्रियतमान् अधिकारिणः प्रति शासनस्य अनुग्रहः, निवृत्तेः अनन्तरं पुनर्नियोजनम्

3 राज्यपालस्य शिवप्रतापशुक्लस्य अभिभाषणेन सह आरब्धं विधानसभा-सत्रम्; २ निमेषेषु एव समाप्तं वाचनम्

4 'जामिया मिल्लिया इस्लामिया-विश्वविद्यालयस्य संस्कृतविभागेन भारतीय-लोकसंस्कृतीनाम् आधारे संस्कृतकविसम्मेलनम् आयोजितम्

## राष्ट्रपति मुर्मु महोदयायाः प्रशिक्षु-अधिकारिभिः सह संवादः

**हिमसंस्कृतवार्ताः- डॉ. नरेन्द्रराणा सिरमौरः।** भारतीय- लेखा- परीक्षासेवा (IAAS), रक्षावैमानिक- गुणवत्ता- आश्वासनसेवा (DGQA), भारतीयव्यापारसेवा (ITS) इत्येतसाम् अधिकारिणः नवदेहलीस्थे राष्ट्रपतिभवने राष्ट्रपतिं द्रौपदी मुर्मु महोदयां मिलितवन्तः।

**प्रमुखबिन्दवः-** भारतीयलेखापरीक्षासेवा (IAAS)राष्ट्रपतिः एतान् अधिकारिणः 'जनविश्वासस्य संरक्षकः' तथा 'वित्तीयविवेकस्य रक्षकः' इति सम्बोधितवती। सा उक्तवती यत् कार्यपालिका- लेखापरीक्षासंस्थानयोः मध्ये उत्तमः समन्वयः सुशासनप्रणाल्याम् उत्तरदायित्वं मूल्यवर्धनं च वर्धयति। लोकतान्त्रिकसंस्थानां सुदृढीकरणाय पारदर्शिता सत्यनिष्ठा च परमावश्यकी अस्ति।

**भारतीयव्यापारसेवा (ITS)**-राष्ट्रपतिः अवदत् यत् निवेशाकर्षणे, रोजगारसर्जने, अनुकूलवातावरणनिर्माणे च भारतीयव्यापारसेवायां महती भूमिका अस्ति। तेषां मार्गदर्शकसिद्धान्तः सर्वदा 'राष्ट्रहितम्' एव भवेत्।

**रक्षावैमानिकगुणवत्ताश्वासनसेवा (DAQA):**सशस्त्रबलेभ्यः विश्वस्तरीयाणां शस्त्राणां विस्फोटकसामग्रीणाञ्च उच्चतमगुणवत्तामानकानि सुनिश्चितं करणं एतस्याः सेवायाः परमं दायित्वम् अस्ति। सा उक्तवती यत् एषा सेवा विज्ञान- तन्त्रज्ञान- अभियान्त्रिकी- राष्ट्ररक्षाणां सङ्गमस्थाने तिष्ठति। राष्ट्रपतिमहोदया अधिकारिणः 'नवोन्मेषी- दृष्टिकोणम्' अङ्गीकर्तुं प्रेरितवती येन सशस्त्रबलाः तकनीकीदृष्ट्या सज्जाः समर्थाः च भवेयुः।

## कश्मीरे, पूर्वोत्तरराज्येषु, माओवादिभिः प्रभावितेषु क्षेत्रेषु च हिंस्रघटनाः अशीतिप्रतिशन्मितं यावत् न्यूनाः अभवन् - केन्द्रीय गृहमन्त्री अमितशाहः।

**हिमसंस्कृतवार्ताः -** केन्द्रीय-गृहमन्त्री अमितशाहः प्रोक्तवान् यत् सप्तत्युत्तर-त्रिशतम् इति अनुच्छेदस्य अनन्तरं कश्मीरे, पूर्वोत्तरराज्येषु, माओवादिभिः प्रभावितेषु क्षेत्रेषु च हिंस्रघटनाः अशीतिप्रतिशन्मितं यावत् न्यूनाः अभवन् । सः अकथयत् यत् तद्दिवसः दूरं न अस्ति यदा एतानि क्षेत्राणि पूर्णतया हिंस्रघटनामुक्तानि भविष्यन्ति । सः नवदेहल्यां आरक्षि-बलानां नवसप्ततितमे स्थापनदिवसकार्यक्रमे सम्बोधयन् आसीत् ।

## प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां भारत-ए.आई-इम्पैक्ट-एक्सपो-विंशति-षड्विंशतिः इत्यस्य उद्घाटनम् कृतवान्




**हिमसंस्कृतवार्ताः -** प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां भारत-ए.आई-इम्पैक्ट एक्सपो-विंशति-षविंशतिः इत्यस्य उद्घाटनम् कृतवान् । पञ्चदिवसात्मकं प्रदर्शनं इण्डिया-ए.आई इम्प्याक्ट्-समिट् इत्यनेन सहैव आयोजितं भवति । अस्मिन् कार्यक्रमे आस्ट्रेलिया, जापान, रशिया, युनाईटेड् किङ्गडम्, फ्रान्स, जर्मनी, इटली, नीदरलैण्ड्स्, स्विट्ज़रलैण्ड्, सर्बिया, एस्टोनिया, ताजिकिस्तान्, अफ्रिका चेत्यादयः त्रयोदश-देशाः ए.आई. पर्यावरण-व्यवस्थायां अन्ताराष्ट्रिय-सहयोगं प्रदर्शयन्ति । प्रदर्शने त्रिशततः अधिकानि क्युरेटेड-प्रदर्शन-मण्डपानि, प्रत्यक्ष-प्रदर्शनानि च आयोज्यन्ते। प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् देशवासिनां कृते एषः अतीव गौरवास्पदः विषयः अस्ति यत् इण्डिया ए. आई. इम्पैक्ट्-समिट् इत्यस्य कृते समग्र जगतः जनाः भारतं प्रति आगच्छन्ति । सामाजिक-सञ्जाल-माध्यमेन, श्रीमोदीवर्यः विश्वनेतृभ्यः, उद्योगनेतृभ्यः, नवान्वेषकेभ्यः, नीतिनिर्मातृभ्यः, शोधकर्तृभ्यः, तन्त्रज्ञानप्रेमिभ्यः च स्वागतपूर्वकं वर्धापनं प्रायच्छत् । अयं देशः विज्ञान-तन्त्रज्ञान-क्षेत्रे द्रुतगत्या प्रगतिं कुर्वन् अस्ति इति प्रमाणम् अस्ति, वैश्विकविकासाय महत्त्वपूर्ण योगदानं अनेन प्रदत्तम् इत्यपि श्रीमोदी प्रत्यपादयत् । प्रधानमन्त्री उक्तवान् यत् अयं अवसरः देशस्य युवकानां क्षमताम् अपि दर्शयति । सः इत्यपि अधोरेखितवान् यत् सम्मेलनस्य विषयः सर्वजनहिताय सर्वजनसुखाय अथवा सर्वेभ्यः कल्याणाय, सर्वेभ्यः सुखाय इति अस्ति, यः मानवकेन्द्रितप्रगतिः साधयितुं कृत्रिमबुद्धिं उपयोक्तुं देशस्य सहभागितां प्रतिबद्धतां च प्रतिविम्बयति।

**अनेन शिखरसम्मेलनेन भारतस्य**

## कृत्रिमबुद्धिमत्तायाः जनाधारितप्रयासः द्योतते

भारत-ए.आई. इम्पैक्ट-शिखरसम्मेलनम् नवदेहल्याम् आरभते । पञ्चदिवसीयं एतत् शिखरसम्मेलनं ग्लोबल-साऊथ् इत्यत्र आयोजितं प्रथमं वैश्विक ए. आई. शिखरसम्मेलनं वर्तते । एतत् शिखरसम्मेलनं वैश्विक ए.आई. कार्यसूचीं निर्माय प्रमुख-मञ्चरूपेण भारतस्य भूमिकां सुदृढं करिष्यति । शिखरसम्मेलने शतं देशाः आमन्त्रिताः, द्विलक्षतः अधिकाः जनाः च अन्तर्जालमाध्यमेन पञ्जीकरणं कृतवन्तः। विंशतिदेशानाम् विश्वनेतारः अस्मिन् कार्यक्रमे भागं ग्रहीष्यन्ति । तेषु फ्रान्स्-देशस्य राष्ट्रपतिः इम्मैनुयेल-मैक्रों, ब्राज़िल-देशस्य राष्ट्रपतिः लूयिज-इनासियो लुला-डा-सिल्वा, स्पेन-देशस्य राष्ट्रपतिः, पेड़ो साञ्चेस-पेरेज़-कास्टेजोन्, स्विट्ज़रलैण्ड्-देशस्य राष्ट्रपतिः, गाय-पार्मेलिन्, नीदरलैंड्स्-देशस्य प्रधानमन्त्री डिक् शूफ, यु. ए. ई. देशस्य अबुधाबी-नगरस्य युवराजः शेख-खालिद-बिन-मोहम्मद-बिन-जायद-अल-नह्यान्, मारिषस-देशस्य प्रधानमन्त्री डा. नवीनचन्द्रा-रामगुलाम, श्रीलङ्का-राष्ट्रपतिः अनुरा-कुमार-दिसानायका, सेशेल्स-देशस्य उपराष्ट्रपतिः, सेबेस्टियन-पिल्लै, भूटान-देशस्य प्रधानमन्त्री शेरिंग-तोब्बो च सन्ति । विदेशमन्त्रालयः अवदत् यत् बोलिविया, क्रोएशिया, एस्टोनिया, फिन्लैण्ड्, ग्रीस्, गयाना, कजाख्स्तान्, लिच्टेन्स्टैन्, सर्बिया, स्लोवाकिया चेत्यादीनां देशानां नेतारः अपि अस्मिन् सम्मेलने भागं ग्रहीष्यन्ति । अस्मिन् शिखरसम्मेलने पञ्चचत्वारिंशत-तः अधिकानां देशानाम् मन्त्रि-प्रतिनिधि-मण्डलानि भागं ग्रहीष्यन्ति ।

## सुभाषितम्

**उद्योगान्निवृत्तस्य,**
**सुसहायस्य धीमतः।**
**छायेवानुगता तस्य,**
**नित्यं श्रीः सहचारिणी।।**

जो बुद्धिमान् व्यक्ति अपने उद्योग को परिश्रमपूर्वक चलाता है उसकी सहायता धन- संपत्ति की अधिष्ठात्री देवी महालक्ष्मी स्वयं करती हैं तथा जिस प्रकार किसी मनुष्य की छाया सदैव उसका अनुसरण करती है उसी तरह महालक्ष्मी भी सदैव उसके ऊपर अपनी कृपा बनाए रखती हैं।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## सामाजिकसौहार्दस्य भ्रातृभावस्य च विषये प्रधानमन्त्रिणः मोदिनः मुफ्ती-ए-आजम महोदयस्य च मध्ये चर्चा



प्रधानमन्त्री नरेन्द्रमोदी नवदेयल्यां भारतस्य मुफ्ती-ए-आजम शेख अबू बकर अहमदेन सह मेलनं कृतवान्। सामाजिकमाध्यमस्य सन्देशे प्रधानमन्त्री मोदी अवदत् यत् मेलनकाले अनेकविषयेषु चर्चा अभवत्। सः सामाजिकसौहार्दस्य, भ्रातृभावस्य वर्धनाय तथा च शिक्षायाः क्षेत्रे परिष्कारस्य मुफ्ती-ए-आजम महोदयस्य प्रयासानां प्रशंसां कृतवान्।

# हिमाचलप्रदेशे आर्थिकसंकटेऽपि प्रियतमान् अधिकारिणः प्रति शासनस्य अनुग्रहः, निवृत्तेः अनन्तरं पुनर्नियोजनम्



**हिमसंस्कृतवार्ताः- शिमला।** केन्द्रात् प्राप्तं राजस्व-हानि-अनुदानम् (आरडीजी) निरुद्धे सति आर्थिकविपत्तिम् अनुभवन्त्या हिमाचलप्रदेश- शासनस्य मंत्रिणां विधायकेभ्यश्च, निगम- मण्डल- अधिकारिभ्यः, परामर्शदातृभ्यः च विशेषानुग्रहः दृश्यते। न केवलं तेषु, अपि तु अनेकानां निवृत्तानाम् अधिकारिणां वार्धक्यमपि सुसंस्क्रियते। प्रदेशे षट्-लक्षाधिकाः बेरोजगाराः पञ्जीकृताः सन्ति। आर्थिक- स्वास्थ्य- सुधारार्थं वित्त-विभागेन रिक्तपदानां निरसनं नूतन- नियुक्तीनां स्थगनं च अनुशंसितम्, तथापि केचन प्रिय- अधिकारिणः निवृत्तेः अनन्तरमपि पुनर्नियोजिताः सन्ति।

वर्तमानशासनेन अनेके वरिष्ठ- आईएएस- एचएएस-अधिकारिणः सहिताः दशाधिकाः जनाः निवृत्तेः परं पुनः सेवायां नियुक्ताः। उच्च- वेतन- सहितं तेषां कृते शासकीय-निवासः, वाहनम्, कर्मचारीवर्गः च प्रदीयते। केचन अधिकारी वेतनं पेंशनं च उभयं गृह्णन्ति। कस्यचित् निवृत्त- आईएएस- अधिकारिणः कृते मासिकं प्रायः सार्ध- एकलक्षात् द्वि- लक्ष- पञ्चाशत्-सहस्र- रूप्यक- पर्यन्तं वेतनभत्तादिकं प्रदीयते। येषां सेवाविस्तारः कृतः, ते नियमित-अधिकारिणां सदृशं वेतन-लाभं च प्राप्नुवन्ति। यस्य विद्युत्-मण्डलस्य अध्यक्षपदे पूर्वं निवृत्त- मुख्य- सचिवादयः नियुक्ताः भवन्ति, तदेव अधुना वित्त- विभागेन हानेः उद्धर्तुं निजी- हस्तेषु दातुं परामृश्यते। पूर्व-शासनेष्वपि निवृत्त-अधिकारिणां पुनर्नियोजन- परम्परा आसीत्, किन्तु अद्य वित्तीय- संकटेऽपि एषा परम्परा परिवर्तयितुं कश्चित् सिद्धो न दृश्यते।

*"आरडीजी-निरोधात् अनन्तरं हिमाचलप्रदेशः आर्थिक-कष्टम् अनुभविष्यति। आय-वृद्ध्यर्थं शासनं निर्णयान् गृह्णाति। सर्वेषु पक्षेषु विचारः क्रियते। उच्च-पदेषु निवृत्त-अधिकारिणां नियुक्तिः अपि पुनर्विचार्या।"*

**यादविंद्र गोमा,आयुष- क्रीडामन्त्री।**

*"व्ययेषु संयमः आवश्यकः। परामर्शदातॄणां सेना निर्मिता अस्ति। निवृत्त-अधिकारिणः पुनर्नियोज्यन्ते, युवानः बेरोजगाराः मार्गेषु सन्ति। शासनं नूतन-नियुक्तीनां निरसनं करोति, किन्तु स्वव्ययेषु न संयमं करोति।"*

**विपिनसिंह-परमारः,भाजपा-विधायकः।**

*"मन्त्रिणः अधिकारीणश्च स्वव्ययेषु न्यूनीकरणं कुर्वन्तु। राजनीतिकभ्रष्टाचारः स्थितिं दुष्प्रभावितवान्। नूतनयोजनाः आगच्छन्ति, किन्तु कार्यान्वयनं न भवति।"*

**-अरुणकुमारशर्मा,निवृत्त- आईएएस-अधिकारी।**

"शासनस्य व्यय-नियन्त्रणम् आवश्यकम्। राजस्व-वृद्ध्यर्थं निर्णयाः करणीयाः। राजस्व- हानि-अनुदानविषये पर्वतीयराज्यानां केन्द्रसमक्षं पक्ष-प्रतिपादनम् आवश्यकम्।"

**श्रीकान्त बाल्दी, पूर्व-मुख्य-सचिवः।**

**येभ्यः पुनर्नियोजनं सेवा-विस्तारश्च दत्तः-**

पूर्व-मुख्यसचिवः रामसुभगसिंह (मुख्यमन्त्रिणः परामर्शदाता), पूर्वमुख्यसचिवः प्रबोधसक्सेना (विद्युत्-मण्डलस्य अध्यक्षः), पूर्व- आईएएस- अधिकारी गोपालशर्मा (ओएसडी-सीएम), पूर्व- सीजीएम- एचपीआईडीबी अनिल कपिल (आधारभूत- संरचना- परामर्शदाता), विशेषसचिवः हरीशगज्जू, योजना- परामर्शदाता डॉ. बसुसूद, संयुक्तसचिवः वित्त- राजेन्द्रशर्मा, संयुक्तसचिवः जीएडी- कुलविन्द्र, स्वास्थ्य- शिक्षा- निदेशकः डॉ. राकेशशर्मा, निवृत्त- अतिरिक्तसचिवः जलशक्ति- महीपालवर्मा, निवृत्त- अतिरिक्तसचिवः वित्त- प्रदीप जसवाल इत्यादयः। केषाञ्चित् निजी-सचिवानामपि पुनर्नियोजनं कृतम्। विद्युत्-मण्डले निवृत्त-सहायक-अभियन्ता अपि पुनर्नियुक्तः। अन्येषु विभागेषु विशेषज्ञता-नाम्ना अपि केचन पुनः सेवायां नियुक्ताः।

*"राज्य-शासनं हिमाचलप्रदेशस्य वित्तीय-स्थितेः सुधारार्थं प्रयतते। व्यय-न्यूनतां आय-वृद्धिं च विषये सभाः आयोजिताः। सर्वेषु विषयेषु मन्थनं प्रवर्तते।"*

**संजय-गुप्तः, मुख्यसचिवः, हिमाचल-शासनम्।**

# HP Vidhansabha Session - अधुना मुख्यसचिवः भविष्यति 'रेरा' (RERA) चयनसमित्याः अध्यक्षः, भू-संपदा-संशोधनविधेयकं पारितम्




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश-विधानसभायां भूसंपदा (विनियमनं एवं विकासः) हिमाचलप्रदेश- संशोधनविधेयकं २०२५ सोमवासरे पारितं जातम्। एतत् विधेयकं भू-संपदा- विनियामक-प्राधिकरणस्य (रेरा) चयनप्रक्रियां अधिकव्यवस्थितां कर्तुं प्रशासनिकदक्षतां वर्धयितुं च आनीतं वर्तते। नगरविकासमन्त्री राजेश धर्माणी महोदयः सदने पुनर्विचाराय एतत् विधेयकं प्रस्थापितवान्। विधेयकस्य माध्यमेन प्राधिकरणस्य अध्यक्षस्य सदस्यानां च नियुक्तये निर्मितायाः चयनसमित्याः स्वरूपे परिवर्तनं कृतम्। अधुना चयनसमित्याः अध्यक्षरूपेण उच्चन्यायालयस्य मुख्यन्यायाधीशस्य स्थाने प्रदेशस्य मुख्यसचिवं नियुक्तुं प्रावधानं कृतम्। सर्वकारस्य तर्कः अस्ति यत् भू-संपदा- विनियामक- प्राधिकरणं मुख्यरूपेण एकः प्रशासनिक-निकायः अस्ति, यस्य सञ्चालनाय प्रशासनिक- विशेषज्ञतायाः आवश्यकता भवति। मुख्यसचिवस्य अध्यक्षतायां समित्याः निर्माणेन न्यायपालिकायाः साक्षात् संलग्नता समाप्तं भविष्यति, कार्यपालिका स्वतन्त्ररूपेण योग्यता- आधारित-नियुक्तीः कर्तुं शक्ष्यति। विधेयके व्यवस्था कृता अस्ति यत् प्राधिकरणस्य अध्यक्षस्य सदस्यानां च कार्यकालः अधुना ४ वर्षाणां निश्चितावधिः अथवा ६५ वर्षाणां आयुः (यत् पूर्वं भवेत्) पर्यन्तं भविष्यति। निष्पक्षतां रक्षितुं अधुना अध्यक्षः सदस्याः च पुनर्नियुक्तेः पात्राः न भविष्यन्ति। अध्यक्षपदाय सम्बन्धितक्षेत्रेषु न्यूनतमेन २० वर्षाणां, सदस्यानां कृते १५ वर्षाणां अनुभवः अनिवार्यः कृतः अस्ति।

# मुख्यमन्त्री उक्तवान्- चतुर्वारं केन्द्रीय- वित्तमन्त्रिणा सह मिलितवान्, कदापि आरडीजी- स्थगनस्य सङ्केताः न दत्ताः



**हिमसंस्कृतवार्ताः- शिमला।** बजट- सत्रात् पूर्वं मुख्यमन्त्री सुखविन्दरसिंहसुक्खू महोदयः सोमवासरे प्रातः ११ वादने विधानसभापरिसरे काङ्ग्रेस-विधायकदलस्य उपवेशनं कृतवान्। अस्मिन् उपवेशने विपक्षस्य आक्रमणानां प्रत्युत्तरं दातुं रणनीतिः निर्मिता। उपवेशनान्तरं मुख्यमन्त्री सासंदं अनुरागठाकुरं प्रति कटाक्षं कुर्वन् अवदत् यत् विपक्षः अपि पश्यति यत् प्रतिवर्षं प्रदेशस्य १० सहस्रकोटिरूप्यकाणां हानिः भवति, तथापि भाजपा स्वपक्षं स्पष्टं न करोति। सः अवदत् यत् विपक्षः वदेत् यत् किं भाजपा आरडीजी-पुनरुद्धाराय (Bahaali) प्रधानमन्त्रिणा सह मेलितुं सिद्धा अस्ति? यदि एवम्, तर्हि सोऽपि सामान्यनागरिकरूपेण प्रधानमन्त्रिणा सह मिलितुं सज्जः अस्ति। मुख्यमन्त्री उक्तवान् यत् पूर्व-केन्द्रीयमन्त्री (अनुरागः) कथयति यत् २० वर्षाणि पूर्वमेव आरडीजी-स्थगनस्य वार्ता उक्ता आसीत्। सः अनुरागात् अस्य प्रमाणानि अयाचत् तथा च अवदत् यत् सः स्वयं चतुर्वारं केन्द्रीय-वित्तमन्त्रिणा सह मिलितवान्, परन्तु कदापि एतादृशाः सङ्केताः न दत्ताः। मुख्यमन्त्रिणा प्रतिपादितं यत् आरडीजी (RDG) विषये राजनीतिः न करणीया। आरडीजी- विषयः यूनां जीविकायाः, निर्धनानां, कृषकाणां च युद्धम् अस्ति। एतत् केवलं सर्वकारस्य युद्धं नास्ति। मम विरुद्धं यत् किमपि वक्तव्यं तत् वदन्तु, परन्तु आरडीजी-विषये राजनीतिः मा भवेत्। तदनन्तरं सर्वदलीय-गोष्ठ्याः आयोजनं जातम्।

**शोभने वातावरणे बहुषु विषयेषु वार्तालापः- कुलदीपसिंहपठानिया**

माध्यमैः सह वार्तालापं कुर्वन् विधानसभाध्यक्षः कुलदीपसिंहः पठानिया महोदयः अवदत् यत् शोभने वातावरणे बहुषु विषयेषु चर्चा जाता अस्ति। उपवेशने संसदीयकार्यमन्त्री हर्षवर्धन चौहानः, विपक्षस्य नेता जयराम ठाकुरः, राज्यसर्वकारस्य उपमुख्यसचेतकः, भाजपापक्षस्य मुख्यसचेतकः च सम्मिलिताः अभवन्। राज्यपालस्य अभिभाषणविषये विपक्षस्य नेतुः काचन अभ्यर्थना अस्ति। अस्मिन् विषये संसदीय-कार्यमन्त्रिणा मुख्यमन्त्रिणा च सह वार्तालापं करिष्यते।

# हिमाचलप्रदेशस्य २२ प्रतिशतजनाः न जानन्ति 'आयुष्मान भारत' योजना किमिति




हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेशे द्वाविंशतिः (२२%) प्रतिशत-जनानां कृते 'आयुष्मान भारत- प्रधानमन्त्री- जन- आरोग्य- योजना' विषये सम्यग्ज्ञानं नास्ति। एतेषु अपि ५.३ प्रतिशत-जनाः केवलं अल्पं ज्ञानं धारयन्ति। चम्बा-शिमलास्थयोः प्रमुख- चिकित्सा- संस्थानयोः सम्बद्धैः चिकित्सकैः कृतस्य अध्ययनस्य एषः निष्कर्षः अस्ति। हिमाचलप्रदेशस्य ४५० वयस्क-नागरिकान् आधारं कृत्वा एषः नमूना-अध्ययनः कृतः।

अध्ययने ज्ञातं यत् ८३ प्रतिशताधिक-जनाः अवगच्छन्ति यत् 'आयुष्मान भारत' इयं निःशुल्का, नगदरहित- स्वास्थ्ययोजना अस्ति। ७२% जनाः सम्यक् उक्तवन्तः यत् अस्यां योजनायां पात्र-परिवाराणां कृते प्रति-स्वर्षं पञ्चलक्ष-रूप्यकपर्यन्तं निःशुल्क-चिकित्सासेवा उपलब्धा भवति।८२% प्रतिभागिनः जानन्ति यत् शल्य- चिकित्सायां गम्भीर-रोग-उपचारयोश्च लाभार्थिना किञ्चन शुल्कं न देयम्। तथापि योजनायाः तकनीकी-प्रक्रियात्मकविषयेषु उत्तराणि संतोषजनकानि नासन्। एषः अध्ययनः चम्बा- मेडिकल- कालेज तथा इन्दिरा- गान्धी- मेडिकल- कालेज (आईजीएमसी) शिमला इत्येतयोः सम्बद्धैः डॉ. वन्दना गौतम, डॉ. रजत कौण्डल, डॉ. हर्षिता ग्रोवर इत्येतैः संयुक्ततया कृतः। एषः 'इंटरनेशनल एकेडमिक रिसर्च जर्नल ऑफ इंटरनल मेडिसिन एंड पब्लिक हेल्थ' इत्याख्ये अन्तरराष्ट्रीय-पत्रिकायां प्रकाशितः। अध्ययनस्य अनुसारं केवलं ५९ प्रतिशत-जनाः एव जानन्ति यत् योजनायाः पात्रता अन्तर्जालमाध्यमेन परीक्षितुं शक्यते।अङ्कीयम्-स्वास्थ्य-परिचय-पत्र-विषये जागरूकता केवलं ६८ प्रतिशतपर्यन्तं सीमिता आसीत्। निजी- परीक्षण-प्रयोगशालासु योजनायाः मान्यता तथा नवीकरण-प्रक्रिया विषये अपि बहवः प्रतिभागिनः स्पष्टं ज्ञानं दातुं न शक्तवन्तः। विशेषज्ञानां मतानुसारं एषा सूचना- अल्पता योजनायाः वास्तविकप्रयोगे प्रमुखा बाधा भवति। अध्ययने सम्मिलितेषु ६७ प्रतिशत-प्रतिभागिनः ग्राम्य- प्रदेशेभ्यः, ३३ प्रतिशत-जनाः नगरीय-प्रदेशेभ्यः आसन्। विशेषज्ञाः मन्यन्ते यत् आशा-कार्यकर्त्रीणां अन्येषां च मूलभूत- स्वास्थ्य-कर्मचारिणां सक्रिय-सहभागेन एषः ज्ञान-अन्तरः न्यूनः कर्तुं शक्यते। अध्ययन-दलस्य मतम्— 'आयुष्मान भारत' इव महत्त्वाकाङ्क्षी- स्वास्थ्य-योजनानां सफलता तदा एव सुनिश्चिता भवति, यदा योजनासु सूचना सरलभाषया, स्थानीयस्तरे, निरन्तररूपेण च जनतायै प्रेष्यते।

## लाभार्थिनः एव योजनां न जानन्ति

अध्ययने ७२% प्रतिभागिनः स्नातक- उपाधियुक्ताः अथवा तस्मात् उच्च-शिक्षिताः आसन्, एषु जागरूकतास्तरः श्रेष्ठः आसीत्। परन्तु गृहिणी-स्वरोजगार- कर्तृ- न्यूनशिक्षितवर्गेषु सूचना अपेक्षया न्यूनतरा दृष्टा, यद्यपि अयं वर्गः एव योजनायाः प्रमुखलाभार्थी अस्ति। समग्र-प्रतिभागिषु ४९% जनानां ज्ञानं उत्तमं, २९% जनानां अत्युत्तमम् आसीत्। प्रत्येक-पञ्चजनानां मध्ये एकः जनः योजनायाः प्रक्रिया-प्रयोगयोः विषये पूर्णतया स्पष्टः नासीत्।

जागरूकतावृद्ध्यर्थं उपायान् पृष्टेषु ७६% जनाः गृह-गृहं गत्वा सूचना-प्रदानं तथा डिजिटल-माध्यमानां संयुक्त- उपयोगं सर्वाधिकप्रभावी उपायः इति अवदन्।

## जागरूकता-अभियानं प्रवर्तिष्यते

स्वास्थ्य-मन्त्री कर्नल-धनीराम-शाण्डिलः अवदत् यत् ग्राम्यप्रदेशेषु केषाञ्चित् जनानां मध्ये सूचना-अभावः भवेत्। जनानां कृते अस्याः योजनायाः विषये विस्तरेण कथ्यते। ये जनाः अस्याः लाभान् न जानन्ति, तान् प्रति शासनं जागरूकता-अभियानं प्रवर्तयिष्यति।

## सीईए-ए.आई. शिखरसम्मेलनम्

मुख्य-आर्थिक-परामर्शदः वी. अनन्त-नागेश्वरन् वर्यः उक्तवान् यत् शिक्षा-परिष्कार-माध्यमेन सामूहिक-आजीविकायाः क्षमतया सह ए.आई. इत्यस्य स्वीकरणम् अपि संयुज्य भारतं वैश्विकरूपेण नेतृत्वं कर्तुं शक्नोति । श्री-नागेश्वरन-वर्यः नवदेहल्यां आल-इम्पैक्ट्-समिट्-विंशति-षड्विंशति इति शिखरसम्मेलने फ्युचर्-आफ्-एम्प्लॉयबिलिटी, ए.आई. इति प्रसङ्गद्वयम् अधिकृत्य आयोजिते सत्रे एतानि वक्तव्यानि प्रायच्छत् । सः अवदत् यत्, भारतं विशालतमेषु सामाजिकतन्त्रेषु अन्यतमं भवितुम् अर्हति यत्र सङ्घर्षस्य अपेक्षया मशीन-लर्निङ्ग्, मानवसंसाधनानि च परस्परं पूरकानि भवितुं शक्नुवन्ति । एज्वव् इत्यस्य प्रमुखः सतीशः सीतारामय्यः अवदत् यत् ए.आई. इति द्रुततर-क्षमता-गुणक-रूपेण कार्यं करिष्यति सहैव ए. आई. तरङ्गोपरि जीवनपर्यन्तम् शिक्षणक्षमता एव मूलमन्त्रं भविष्यति । सः पुनः अवदत् यत् ए.आई. इत्यनेन व्यापारेषु अधिकोत्पादकक्षमता प्राप्स्यते । सः इत्यपि अवदत् यत् ए.आई इत्यस्य माध्यमेन कार्यनिष्पादनस्य उत्तरदायित्वं स्वीकर्तुं अन्ततः एकः मनुष्यः भवेत् ।

**आर्मी-ए.आई. इम्पैक्ट्-** भारतीयसेना सैन्यक्षेत्रस्य विस्तरेण सह सुस्थिरतायाः सुदृढीकरणार्थं, परिचालन-सज्जतां वर्धितुं, भविष्यस्य सज्जतां, रक्षा-क्षमतानां निर्माणाय च ए.आई इत्यस्य एकीकरणस्य महत्त्वं अस्मिन् ए.आई-इम्पैक्ट इति शिखरसम्मेलने प्रकाशयिष्यति। सामाजिक-सञ्चाल-माध्यमेन, सेना अवदत् यत् आगन्तुकाः नवदिल्ल्याः भारतमण्डपे भारतीय-सेनायाः ए.आई. प्रदर्शिनी इत्यत्र अत्याधुनिकानि, द्वयोपयोगि-तन्त्रज्ञानानि च अन्वेष्टुं शक्नुवन्ति ।

# राज्यपालस्य शिवप्रतापशुक्लस्य अभिभाषणेन सह आरब्धं विधानसभा-सत्रम्; २ निमेषेषु एव समाप्तं वाचनम्

**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेश-विधानसभायाः बजट-सत्रं राज्यपालस्य शिवप्रतापशुक्लस्य अभिभाषणेन सह आरब्धम्। परन्तु राज्यपालः स्वकीयं अभिभाषणं केवलं २ निमेषोत्तर-१ सेकण्ड् (2 min 1 sec) काले एव समाप्तवान्। राज्यपालः अभिभाषणस्य प्रारम्भिकौ द्वौ परिच्छेदौ (Paragraphs) एव पठितवान्। राज्यपालः स्पष्टीकृतवान् यत्— "परिच्छेद ३ तः १६ पर्यन्तं संवैधानिक-संस्थानां विरुद्धं टिप्पणी अस्ति, अतः अहं एतत् न पठितुं शक्नोमि।" राज्यपालः उक्तवान् यत् शेषभागे सर्वकारस्य उपलब्धयः सन्ति, ताः सदस्याः स्वयं पठितुं शक्नुवन्ति।

## पूर्वमपि द्विवारं जातं ईदृशम्

हिमाचलप्रदेशे इतः पूर्वमपि द्विवारं एतादृशी स्थितिः उत्पन्ना
१. २०१५ तमे वर्षे: यदा कल्याणसिंहः राज्यपालः आसीत्, तदा तेन पूर्णम् अभिभाषणं न पठितम्। राज्यद्वयस्य कार्यभारस्य व्यस्ततायाः कारणात् तेन एवं कृतम् आसीत्।
२. जयराम-सर्वकारकाले: राज्यपालः बण्डारु दत्तात्रेयः अपि अभिभाषणं अपूर्णं त्यक्तवान् आसीत्। तस्मिन् समये विपक्षे स्थितानां काङ्ग्रेस-विधायकानां विरोधात् सदने महान् कोलाहलः जातः आसीत्।

### विधानसभातः 'लोकभवनं' प्रति प्रस्थितः राज्यपालः

राज्यपालः अभिभाषणविषये माध्यमैः (Media) सह किमपि न उक्तवान्। सः विधानसभातः साक्षात् 'लोकभवनं' प्रति प्रस्थितः। वार्ताहरैः तस्य प्रतिक्रिया प्राप्तुं प्रयत्नः कृतः, परन्तु सः किमपि न अवदत्।

## मुख्यमन्त्रिणः प्रतिक्रिया

राज्यपालस्य अल्पकालीन-अभिभाषणे मुख्यमन्त्री सुखविन्दरसिंहसुक्खू महोदयः अधिकं किमपि न उक्तवान्। सः अवदत्— "राज्यपालस्य अभिभाषणे परिच्छेद ३ तः १६ पर्यन्तं संवैधानिक-विषयाः लिखिताः सन्ति। राज्यपालः उक्तवान् यत् भवन्तः आरडीजी (RDG) विषये चर्चां कुर्वन्तु। सर्वकारः अपि सदने अस्मिन् विषये चर्चां वाञ्छति तथा च भाजपा-पक्षस्य पक्षं (Stand) ज्ञातुं इच्छति।"

## किमर्थं न पठितम् अभिभाषणम्?

सम्पूर्णम् अभिभाषणं केन्द्रसर्वकारेण स्थगितस्य आरडीजी (राजस्व-हानि-अनुदान) इत्यस्य उपरि केन्द्रितम् आसीत्। राज्यपालः उक्तवान् यत् बिन्दु ३ तः १६ पर्यन्तं संवैधानिक-संस्थानां विरुद्धं टिप्पण्यः सन्ति, याः न पठितुं शक्यन्ते। अतः सः प्रारम्भिकं भागं पठित्वा अवशिष्टं त्यक्तवान्।

### अभिभाषणोत्तरं आरडीजी-विषयः (RDG Issue)

अस्मिन् अवसरे विधानसभायाः बजट-सत्रे परम्परायाः भिन्नं दृश्यं दृष्टम्। सामान्यतः राज्यपालस्य अभिभाषणानन्तरं 'धन्यवाद-प्रस्तावे' चर्चा भवति, परन्तु अस्मिन् अवसरे सर्वकारः साक्षात् केन्द्रसर्वकारेण स्थगितायाः राजस्व-हानि-अनुदान (RDG) योजनायाः विषये सदने चर्चां प्रारप्स्यति।

## लिखित-अभिभाषणस्य मुख्याः अंशाः

राज्यपालस्य लिखिते अभिभाषणे सूचितं यत् संविधानस्य अनुच्छेद २७५(१) अन्तर्गतं तेभ्यः राज्येभ्यः अनुदानं दीयते, येषां आय-व्यययोः मध्ये महदन्तरं भवति। हिमाचलप्रदेशस्य राज्यत्व-प्राप्त्यनन्तरं प्रायः सर्वैः वित्त-आयोगैः आरडीजी-राशिः वर्धिता। केवलं १३-तमे वित्त-आयोगं विहाय सर्वैः एतद् दत्तम्, परन्तु १६-तमे वित्त-आयोगे इयं राशिः 'शून्यं' कृता अस्ति। अभिभाषणे एतत् लघु-पर्वतीयराज्यानां कृते गम्भीरचिन्तायाः विषयः इति वर्णितम्। भौगोलिक-परिस्थितीनां कारणात् एतादृशेषु राज्येषु विकासयोजनानां, सामाजिक-कल्याण-कार्यक्रमाणां तथा आपदा-प्रबन्धनस्य कृते एतत् अनुदानं अतीव महत्त्वपूर्णं वर्तते।

# अन्तर्राष्ट्रीय-मण्डी-महाशिवरात्रि-महोत्सवः - राजकीय-शोभायात्रया लघ्वीकाश्यां मण्ड्यां देवी-देवतानां महाकुम्भः आरब्धः



**हिमसंस्कृतवार्ताः - लघ्वीकाशी मण्डी।**

हिमाचलप्रदेशस्य 'छोटी काशी' इति प्रसिद्धस्य मण्डी-नगरस्य पञ्चशत (५००) वर्षाणां स्वर्णिमयात्रया सह सप्तदिवसीयः अन्तर्राष्ट्रीय-महाशिवरात्रि-महोत्सवः सोमवासरे आरब्धः। अस्य देव-महाकुम्भस्य आरम्भः पारम्परिकया राजकीय-शोभायात्रया अभवत्। राज-देवता-माधोरायस्य दरबारात् राजसी-वैभवेन निर्गता प्रथमा जलेब-यात्रा 'पड्डल' क्रीडाङ्गणं प्राप्य समाप्ता अभवत्। श्रद्धायाः महासागरेण सह जीप-यानेन पड्डल-क्रीडाङ्गणं प्राप्तवान् उप-मुख्यमन्त्री मुकेश अग्निहोत्री महोदयः अस्य महोत्सवस्य विधिवत् उद्घाटनं कृतवान्। अस्मात् पूर्वं जिलाधीश-कार्यालय-परिसरे तस्मै पारम्परिकं शिरोवस्त्रम् धारयित्वा सम्मानं कृतम्। तदनन्तरं सः राज-माधोराय-मन्दिरं गत्वा विधिवत् पूजा-अर्चनां सम्पादितवान्। इतः एव अस्य भव्यस्य देव-महाकुम्भस्य प्रथमा पारम्परिकी जलेब-यात्रा आरब्धा। अस्यां शोभायात्रायां स्थानीयजनाः देवलवः (Devalus) च स्व-देवी-देवतानां रथैः सह नृत्यन्तः गायन्तश्च सम्मिलिताः अभवन्।

## १९ फरवरी दिनाङ्के मध्यमा तथा २२ फरवरी दिनाङ्के अन्तिमा जलेब-यात्रा भविष्यति

अन्ताराष्ट्रीय-महाशिवरात्रि-महोत्सवस्य अवसरे तिस्रः 'जलेब' शोभायात्राः निर्गच्छन्ति। अधुना १९ फरवरी दिनाङ्के मध्यमा तथा २२ फरवरी दिनाङ्के अन्तिमा जलेब-यात्रा निर्गमिष्यति। अन्तिमे दिने 'चौहटा' (Chauhta) इत्यत्र 'जातर' (Jatar) सज्जं भविष्यति, यत्र सर्वे देवी-देवताः विराजमानाः भूत्वा स्व-स्व-देवालयं प्रति प्रस्थास्यन्ति।

## प्रशासनेन चिते स्थाने उपवेष्टुं देव-मार्कण्डेय-ऋषिः विभूषणश्च न सिद्धौ; अन्ये देवाः अपि असन्तुष्टाः

अन्ताराष्ट्रीय-महाशिवरात्रि-महोत्सवार्थम् आगतौ देव-मार्कण्डेय-ऋषिः तथा देव-विभूषणः च मण्डल-प्रशासनेन 'सर्व-देवता-समित्या' च सह स्वकीयं रोषं प्रकटितवन्तौ। मण्डी-नगरस्य पड्डल-क्रीडाङ्गणे अस्मिन् वर्षे प्रशासनेन देवी-देवतानां कृते यत् नवीनं स्थानं निश्चितं, तत्र उपवेष्टुं उभौ देवौ अस्वीकृतवन्तौ। देवौ प्रशासनं तथा सर्व-देवता-समितिं प्रति स्व-आदेशं श्रावितवन्तौ यत्— "यस्मिन् स्थाने वयं गतेभ्यः २० वर्षेभ्यः उपविशामः, तत्रैव उपवेक्ष्यामः, अन्यथा वयं रुष्टाः भूत्वा स्व-देवालयं प्रति प्रत्यागमिष्यामः।" महाशिवरात्रि-महोत्सवस्य परम्परां निर्वोढुं देव-मार्कण्डेय-ऋषिः विभूषणश्च सायं काले राज-देवता-माधोरायस्य दरबारं प्राप्तवन्तौ देव-मिलनं च कृतवन्तौ। प्रशासनेन समित्या च सह वार्तालापस्य आश्वासनं दत्तम्। सोमवासरे प्रशासनं समस्यायाः समाधानं करिष्यति।

## यदा देवालयात् महोत्सवार्थं प्रस्थिताः तदा एव 'देववाणी' अभवत्

बालीचौकी-क्षेत्रस्य अधिष्ठातृ-देवौ मार्कण्डेय-ऋषिः विभूषणश्च यदा महाशिवरात्रि-महोत्सवे आगन्तुं प्रस्थितौ, तदा एव ताभ्यां नवीन-स्थाने उपवेष्टुं 'देववाणी' माध्यमेन रोषः प्रकटितः आसीत्। देव-मार्कण्डेय-ऋषेः पूजकाः तिलकराजः, बलदेवशर्मा, जीवनशर्मा, निठ्ठूशर्मा च उक्तवन्तः यत्— "देवौ नवीन-स्थाने उपवेष्टुं नाङ्गीकृतवन्तौ।" अन्ये देवाः अपि स्वकीये पुरातने स्थाने एव उपवेष्टुम् इच्छां प्रकटितवन्तः तथा च तत्रैव उपविष्टाः सन्ति।

# "लौकिकन्यायकोशः"

## "अन्यकारुकान्यायः"

यः कृमिः जुगुप्सावहे स्थले उत्पद्यते तस्य आहारः अपि तादृशः जुगुप्साकारः भवति। दुष्टे वातावरणे उत्पन्नः दुष्टाभिः भावनाभिः पोषितः भवति इत्यर्थे अस्य प्रयोगः भवति।

**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य हरियाणा-प्रदेशे एकेन कुटुम्बेन कश्चन वैदेशिकः द्विचक्रिका-यात्री स्वगृहं नीतः।

**नन्दिनी-** सत्यम्, तस्य परिवारस्य आतिथ्यं सर्वैः श्लाघितम्। एतद् विहाय, गीर-वने एका क्रुद्धा सिंहि गर्जिता, परं सिंहः मौनेन स्थितः।

**काव्या-** कलहे मौनमेव उचितम्। अपरपक्षे, पुरी-वेलातटे सुदर्शन-महोदयेन सप्तदश- सहस्र- रुद्राक्षैः शिव-मूर्तिः रचिता।

**नन्दिनी-** एषा महती कला! महाशिवरात्रौ अपूर्वा भक्तिः प्रदर्शिता। अन्ते तु, एका वधूः स्व-हस्ततले आपण-संस्थायाः चिह्नं चित्रितवती अस्ति, यतः तया तत्रैव स्व-पतिः मिलितः।

**काव्या-** सा वधूः तु अतीव स्वामिभक्ता। अद्यतनी वार्ता समाप्ता। नमो नमः।



# जामिया मिल्लिया इस्लामिया-विश्वविद्यालयस्य संस्कृतविभागेन भारतीय-लोकसंस्कृतीनाम् आधारे संस्कृतकविसम्मेलनम् आयोजितम्

जामिया मिल्लिया इस्लामिया-विश्वविद्यालयस्य संस्कृतविभागेन “भारतीय-लोकसंस्कृतिविषये” आधारितं संस्कृतकविसम्मेलनम् अतीव सौहार्दपूर्णे वातावरणे समनुष्ठितम्। अस्मिन् कविसम्मेलने ऊर्दू अरबी फारसी हिन्दी भाषाणामपि कवीनां काव्यपाठः समजायत।अस्य कार्यक्रमस्य अध्यक्षतां पद्मश्री-समलङ्कृतः, सम्पूर्णानन्द-विश्वविद्यालयस्य पूर्वकुलपतिः, विश्वविख्यातः त्रिवेणी कविः अभिराजराजेन्द्रमिश्रवर्यः व्यदधात्।विशिष्टातिथिरूपेण कविरूपेण च प्रोफेसर सत्यप्रकाशदुबे (जयनारायणव्यासविश्वविद्यालयः, जोधपुर), प्रोफेसर वेदनाथमिश्रः (जयप्रकाशविश्वविद्यालयः, छपरा), साहित्य-अकादमी-पुरस्कृतः श्रीप्रेमशङ्करशर्मा, डॉ. उमामहेश्वरः, डॉ. आशाझा, डॉ. अरविन्दकुमारतिवारी, डॉ. राजकुमारमिश्रः, डॉ. युवराजभट्टराई, डॉ. ब्रजेशकुमारपाठकः, डॉ. अमरेशकुमारमिश्रः तथा डॉ. एम्. किशन चेत्त्यादयः विद्वांसः कवयः उपस्थिताः आसन्।एतैः सह जामिया-मिल्लिया-इस्लामिया-विश्वविद्यालयस्य उर्दूविभागात् प्रो. मोहम्मद् एहसानुलहक्, फारसीविभागात् डॉ. यासिर अब्बासः, अरबीविभागात् डॉ. महलूनुर्रहमानः च निज-निज-सहभागित्वेन काव्यपाठेन च कार्यक्रममिमं समलङ्कृतवन्तः। वस्तुतः जामिया मीलिया इस्लामिया विश्वविद्यालयेन अस्य आयोजनस्य माध्यमेन भाषासामञ्जस्यस्य मिथः सौहार्दस्य राष्ट्रियैकतायाश्च उत्कृष्टः संदेशः प्रसारितः।एतस्मिन् अवसरे सर्वैरपि विविधाः लोकसंस्कृतिपरम्पराः समाश्रित्य विरचिताः कविताः सम्प्रस्तुताः। ध्येयमस्ति यदस्मिन् काव्यिकानुष्ठाने संस्कृतकविः साहित्यकारश्च डॉ. युवराजभट्टराई काव्यप्रस्तुतिप्रसङ्गे विशेषरूपेण स्वीयां ओजस्विनीं लोकजीवनाधारितां च होलिका-विषयिणीं काव्यरचनां सस्वरं प्रस्तुतवान्।तस्य काव्यप्रसादेन, भावप्रकटनकौशलेन होलिकाधारितायाः लोकसंस्कृतेः मार्मिक-चित्रणेन च श्रोतॄणां हृदयानि भृशम् रञ्जितानि । सभागारः करतलध्वनिना पुनःपुनः गुञ्जितः।अत्रावसरे जामिया मिलिया इस्लामिया विश्व विद्यालयस्य संस्कृत-विभागस्य अध्यक्षः प्रोफेसर जय प्रकाश वर्यः प्रोदैरयत् यत्— भारतीय-लोकसंस्कृतिः राष्ट्रस्य आत्मा अस्ति, तस्य संरक्षणं संवर्धनं च अस्माकं सर्वेषां दायित्वम्। अथ चास्य कार्यक्रमस्य समग्रमपि संयोजनं विभागस्यैव वरिष्ठः आचार्यः डॉ. धनञ्जयमणिः त्रिपाठी समभालयत्। अन्ते च राष्ट्रगानपूर्वकं सारस्वत-कार्यक्रमोऽयं सम्पन्नताम् अगात्।